शुक्र कवचं

ॐ अस्य श्रीशुक्रकवच स्तोत्र महामंत्रस्य, भरद्वाज ऋषिः, अनुष्टुप् छंदः, भगवान् शुक्रो देवता, अं बीजं गं शक्तिः वं कीलकं मम शुक्रग्रहप्रसाद सिद्ध्यर्थे जपे विनियोगः.भां अंगुष्ठाभ्यां नमः भीं तर्जनीभ्यां नमः भूं मध्यमाभ्यां नमः भैं अनामिकाभ्यां नमः भौं कनिष्ठिकाभ्यां नमः भः करतलकरपृष्ठाभ्यां नमः एवं हृदयादिन्यासः. भूर्भुवस्सुवरोमिति दिग्बंधः ध्यानम् शुक्रं चतुर्भुजं देवं अक्षमालाकमंडलुम्, दंडहस्तं च वरदं भानुज्वालाङ्गशोभितं.शुक्लांबरं शुक्लमाल्यं शुक्ल गंधानु लेपनम्. वज्र माणिक्य भूषाढ्यं किरीटमकुटोज्ज्वलम्. श्वेताश्वरथमारूढं मेरुं चैव प्रदक्षिणम्, मृणाळकुंदेंदुपयोहिमप्रभं सिताबरं स्निग्धवळक्षमालिनम्, समस्तशास्त्रश्रुतितत्वदर्शिनं ध्यायेत्कविं वाचितवस्तुसंपदे. शिरो मे भार्गवः पातु फालं पातु ग्रहाधिपः नेत्रे दैत्य गुरुः पातु श्रोत्रे श्री चंदनद्युतिः पातु मे नासिकां काव्यो वदनं दैत्यवंदितः, रसनामुशनाः पातु कर्णं श्री कंठभक्ति मान्. भुजौ तेजोनिधिः पातु वक्षो योगविदां वरः अक्षमालाधरो रक्षेत् कुक्षिं मे चक्षुषांकरः कटिं मे पातु विश्वात्मा सक्थिनी सर्व पूजितः, जानुनी तु भृगुः पातु जंघे मे महतां वरः. गुल्फौ गुणनिधिः पातु पादौ मे पांडुरांबरः सर्वाण्यंगानि मे पातु शुक्र कविरहर्निशम्. य इदं कवचं दिव्यं पठेच्छ श्रद्धयान्वितः नतस्य जायते पीडा भार्गवस्य प्रसादतः. इति श्री स्कांदे महापुराणे शंकरसंहितायां शुक्र कवच स्संपूर्णः